# संस्कृत वार्ताः

**दिनाङ्क : 18/07/2025** **सायम् - 06:20**

**आदौ-मुख्यवार्ताः**

- **प्रधानमन्त्रिणा श्रीमोदिना अद्य बिहारस्य मोतिहारी क्षेत्रे द्वि-शताधिक-सप्त-सहस्र-कोटिक-रूप्यकतोऽपि अधिकमूल्य-युतानां नैकासां विकास-परियोजनानां कृतं लोकार्पणम्।**
- **प्रधानमन्त्रिणा अद्यापराह्णे पश्चिमबङ्गस्य दुर्गापुरे अपि पञ्च-सहस्र-कोटिरूप्यकाणां विकास-परियोजनाः लोकार्पण-पूर्वकं राष्ट्राय समर्पिताः।**
- **टी.आर.एफ. इति "द रेजिस्टेंस फ्रंट" इत्यस्य वैदेशिकातंकि-गुल्मस्य, विशेष-रूपेण नामित-वैश्विक-आतंकवादि-गुलमत्वेन घोषणार्थम् अमेरिका-देशस्य निर्णयः भारतेन श्लाघितः।**
- **अद्य भारतीय-नौसैन्यबलेन विशाखापत्तनम-मध्ये स्वदेशे निर्मितस्य 'निस्तार' उपकरणस्य नौसैन्यबले समावेशः कृतः।**
- **चतुरङ्गक्रीडायां भारतीयः क्रीडकः ग्रैण्ड मास्टर अर्जुन एरिगैसी, लॉस-वेगास्-नगरे फ्रीस्टाइल-ग्राण्डस्लैम्-क्रीडायाः उपांत्यचक्रं प्रविष्टवान्।**

**अथ वार्ताः विस्तरेण**

**प्रधानमन्त्री-रेलविभाग-परियोजनानाम् आधारशिला (HL-1)**

प्रधानमन्त्री श्री नरेन्द्र मोदी अद्य बिहारस्य मोतिहारी क्षेत्रे द्वि-शताधिक-सप्त-सहस्र-कोटिक-रूप्यकतोऽपि अधिकमूल्य-युतानां नैकासां विकास-परियोजनानां लोकार्पणं शिलान्यासं च व्यदधात्। इमाः परियोजनाः रेल, राजमार्गः, ग्रामीण-विकासः, मत्स्य-पालनम्, वैद्युतिक-प्रविधिः, सूचना-प्रौद्योगिकी चेति भूरि क्षेत्रैः आबद्धाः सन्ति। एतस्मिन् अवसरे उपस्थितान् जनान् सम्बोधयन्, श्रीमोदी प्रावोचत् यत् पूर्वीय-भारतस्य विकासार्थं बिहारस्य विकासः आवश्यकः अस्ति। अमुना प्रोक्तं यत् अद्यत्वे बिहारे तीव्रगत्या विकासः जाजायते यतोहि केन्द्र-सर्वकारः, राज्य-सर्वकारश्च मिलित्वा राज्योन्नतये कार्यं कुर्वन्तौ वर्तेते। श्रूयतां तावत् ...

प्रधानमन्त्री प्रोदैरयत् यत् यू.पी.ए. सर्वकारस्य दश-वर्षाणाम् कार्यकाले बिहाराय केवलम् प्रायशः पादोन द्वि-लक्ष-कोटिकानि रूप्याकाणि एव वितरितानि। असौ न्यगदत् यत् विगत-दश-वर्षेषु एन.डी.ए. सर्वकारेण बिहारस्य विकासाय यू.पी.ए. शासनादपि अधिकः धनराशिः आवण्टितः अस्ति। प्रधानमन्त्री मोदी अवोचत् यत् केन्द्रं देशे युव-

जनेभ्यः आजीविका-प्रदानार्थम् एक-लक्ष-कोटिकानि रूप्याकाणि व्ययीकरिष्यति। प्रधानमन्त्री मोदी अग्रे अवदत् यत् विगत-कतिपय-वर्षेषु बिहारस्य युवकेभ्यः राज्ये एव जीविकायाः अधिकाधिकान् अवसरान् उपपादयितुं भृशं कार्यम् आचरितम् अस्ति। श्रीमोदी उक्तवान् यत् राजद-कांग्रेस-दलानां शासने निर्धनानां पक्व-गृह-निर्माणम् असम्भवम् आसीत् । अमुना सविशेषं वर्णितं यत् विगतैकादश-वर्षेषु प्रधानमन्त्रि-आवास-योजनायाः अन्तर्गतं निर्धनेभ्यः चतुष्कोटितोऽप्यधिकानि गृहाणि निर्मितानि सन्ति, तेषु षष्टि-लक्ष-मितानि गृहाणि बिहारे एव निर्मितानि आसन्। प्रधानमन्त्रिणा नैकाः रेल-परियोजनाः अपि राष्ट्राय समर्पिताः। श्री-मोदिना क्षेत्रे सम्पर्कं सुष्ठुतरं विधातुं राजेन्द्र-नगर टर्मिनल पटना-तः नवदिल्ली पर्यन्तं, बापूधाम-मोतिहारी-तः दिल्लीं यावत्, दरभंगा-तः लखनऊ नगरं यावत्, मालदा-टाउन-तः लखनऊ-नगर-पर्यन्तं चतुर्णां नूतनानाम् अमृत-भारत-रेल-यानानां प्रचलनार्थमपि हरित-ध्वज-प्रदर्शनपूर्वकं अनुमतिः प्रदत्ता। प्रधानमन्त्री अवदत यत् "दीनदयाल अन्त्योदय योजना-राष्ट्रीय-ग्रामीण-आजीवि

**प्रधानमन्त्री-बंगाल (HL-2)**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य अपराह्णे पश्चिमबङ्गस्य दुर्गापुरे पञ्च-सहस्र-कोटिरूप्यकाणां नैकासां विकास-परियोजनानां आधारशिलास्थापनं, उद्घाटनं, राष्ट्राय समर्पणञ्च कृतम्। तत्र सभां सम्बोधयता प्रधानमन्त्रिणा उक्तं यत् एताः परियोजनाः प्रमुखतया क्षेत्रेषु जनसम्पर्कं सम्वर्धयिष्यन्ति, वातीन्धनाधारित-परिवहनेभ्यः प्रोत्साहनं प्रदास्यन्ति, वातीन्धनाधारित-अर्थव्यवस्थायाः समर्थनं च करिष्यन्ति। एतैः उपक्रमैः अस्य लौहसार-नगरस्य परिचयः अधिकः सुदृढः भविष्यति इत्यपि सः अवदत्। सः उक्ततवान् यत् पश्चिम-बङ्गराज्यं देशस्य तेषु राज्येषु अन्यतमम् अस्ति यत्र वन्देभारतस्य रेलयानानि महत्यां संख्यायां प्रचलन्ति। श्रीमोदी अवदत् यत् दुर्गापुरं न केवलं लौहसार-नगरम् अपितु भारतस्य कार्यबलस्य प्रमुखं केन्द्रम् अपि अस्ति तथा च एषा नगरी देशस्य विकासे महतीं भूमिकां निर्वहति। श्रूयतां तावत्....

विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः www.newsonair.gov.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल ऐप इत्यत्र अपि उपलब्धो भविष्यति।

**भारत-पाक-टीआरएफः (HL-3)**

भारतेन टी.आर.एफ. इति "द रेजिस्टेंस फ्रंट" इत्यस्य वैदेशिकातंकि-गुल्मस्य, विशेष-रूपेण नामित-वैश्विक-आतंकवादि-गुलमत्वेन घोषणार्थम् अमेरिका-देशेन कृतः निर्णयः श्लाघितः। पाकिस्तान-स्थितस्य आतंकवादि संघटनम् लश्कर-ए-तैयबा इत्यस्य एकः छद्म-गुल्मः, टी.आर.एफ., जम्मू-कश्मीरस्य पहलगाम इत्याख्ये प्रथम-ग्रामे नागरिकेषु दुरापादित-जघन्याक्रमण-सहितेषु नैकेषु अन्येष्वपि आतङ्कि-गतिविधिषु संलिप्तः आसीत्। विदेश-

मन्त्री डॉ. एस. जयशंकरः एतस्य निर्णयस्य कृते अमेरिकीय-विदेश-विभागस्य, विदेश-मन्त्रिणश्च मार्को रुबियो इत्यस्य श्लाघा कृता। अमुना प्रोदितं यद् एतद्धि भारत-अमेरिका-तङ्कवाद-रोधि सहयोगस्य पुष्टिं कुरुते। ध्यातव्यमस्ति यद् भारतेन आतंकवादं विरुध्य प्रवर्तिते युद्धे, आतंकि-संरचनानां विध्वंसीकरणे च वैश्विक-सहयोगस्य आवश्यकतायां अविरतं बलं प्रदत्तम् अस्ति।

**आईएनएस निस्तारः (HL-4)**

अद्य विशाखापत्तनम-मध्ये समायोजिते एकस्मिन् उपकरण-समावेश-समारोहे, रक्षा-राज्य-मन्त्री सञ्जय-सेठः डाइविंग सपोर्ट वेसल्स, इत्याख्यस्य स्वदेशे निर्मितस्य 'निस्तार' उपकरणस्य नौसैन्यबले समावेशम् अकरोत्। एतस्मिन् समारोहे नौ-सेना-प्रमुखेन् एडमिरल दिनेश के. त्रिपाठिना, अन्यैः वरिष्ठैः गणमान्यैः च साकं रक्षा-राज्य-मन्त्री संजय सेठः अपि सम्मिलितः आसीत्।

**प्रवर्तननिदेशालयः-निगडनम्**

प्रवर्तन-निदेशालयस्य एकेन दलेन अद्य छत्तीसगढस्य भिलाईनगरे पूर्वमुख्यमन्त्रिणः भूपेश-बघेलस्य निवासस्थाने सहसान्वेषणम् कृतम्। अद्य प्रातःकाले ईडी-अधिकारिणः सी.आर.पी.एफ.-भटैः सह सहसान्वेषणाय बघेलस्य निवासस्थानं प्राप्तवन्तः। अत्रान्तरे ईडी इत्यनेन भूपेश-बघेलस्य पुत्रः चैतन्य-बघेलः निगडीकृतः अस्ति। तदनन्तरं चैतन्यबघेलेन सह भिलाईतः रायपुरं प्रति ईडी-दलं प्रस्थानम् अकरोत् । अस्य सहसान्वेषणस्य विषये विस्तृत-सूचनायाः प्रतीक्षा अस्ति।

**आई.आई.सी.टी. परिसरः**

भारतस्य रचनात्मक-अर्थव्यवस्थायाः महत्वपूर्णरीत्या संवर्धनं कुर्वन्तौ, केन्द्रीय-विद्युत्-सूचना-प्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः , महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र-फडणवीसः च संयुक्त-रूपेण मुम्बई-स्थिते एन.एफ.डी.सी. परिसरे भारतीय-रचनात्मक-प्रौद्योगिकी-संस्थानस्य आई.आई.सी.टी. इत्यस्य प्रथम-परिसरस्य उद्घाटनं कृतवन्तौ, यद्धि वैश्विक-रचनात्मक-प्रविधिपरायाम् अर्थव्यवस्थायां भारतस्य क्षमता-निर्माणस्य दिशि एकः महत्वपूर्णः पदक्षेपः अस्ति। उपस्थितं जनसमूहं संबोधयन्, केन्द्रीय मन्त्री अश्विनी वैष्णवः युवजनानां सशक्तीकरण-विषये, रचनात्मक-उद्योग-विषये, च सर्वकारस्य दृष्टिकोणे प्रकाशं क्षिप्तवान्। श्रूयतां तावत्...

**अमरनाथ-यात्राः जम्मूकश्मीरम्,**

गतदिने कश्मीरे जम्वां च संभाग-द्वयेऽपि अधिकांश-क्षेत्रेषु ऋतोः प्रतिकूलतायाः कारणेन श्रीअमरनाथयात्रा अस्थायी रूपेण स्थगिता आसीत्। आधिकारिक-स्रोतांसि कथयन्ति यत् ऋतोः परिष्कारं विलोक्य, अधिकारिभिः अद्य प्रातः भगवती-नगर-जम्मू, आधार-शिबिरात् यात्रिणां सप्तदश गुल्मः कश्मीरक्षेत्रं प्रति गन्तुम् अनुमतः। धेयमस्ति यत्

पुरुषा:, महिला:, बालका:, साधव:, साध्व्यश्च सहिता: सर्ध-नव-सहस्राधिका: तीर्थार्थिन: पञ्च-त्रिंशदधिक-त्रि-शत-मितेषु वाहनेषु समारुह्य कश्मीरक्षेत्रे निज-निज शिविराणि प्रति प्रस्थितवन्त:।

**ऋतुविज्ञान विभाग:**

ऋतुविज्ञान विभागेन अद्य राजस्थाने दक्षिणान्तरिक-कर्नाटके च भृशं वृष्टे: अनुमानम् कृतम् अस्ति। ऋतुविज्ञान-विभागेन तटीय-कर्नाटके केरले, माहे इत्यत्र, तमिलनाडौ, पुडुचेर्यां, कराईकल-क्षेत्रे, पश्चिम-मध्य-प्रदेशे, पश्चिमोत्तर-प्रदेशे च अद्य अतिवृष्टे: भविष्यवाणी कृतास्ति।

**लद्दाख एलजी-शपथः**

पूर्वजम्मू-कश्मीर-राज्यस्य पूर्व-उपमुख्यमन्त्री कविन्दर-गुप्ता अद्य आधिकारिक-रूपेण लद्दाख इति ललाटाक्ष-राज्ये उपराज्यपालत्वेन पदभारस्य शपथ वचनं स्वीकृतवान्। लेह-नगरस्य राजनिवासे आयोजिते समारोहे जम्मू-कश्मीर-लद्दाख-उच्चन्यायालयस्य मुख्य-न्यायाधीशेन अरुणपल्ली इत्यनेन तस्मै पदगोपनीयताया: शपथवचनं कारितम्। शपथवचनस्य पश्चात् स्थानीयवार्ताहरैः सह सम्भाषणे सः आश्वासितवान् यत् सः सबका साथ सबका विकास इति आदर्शवाक्यम् अनुसृत्य जनैः सह निकटतया कार्यं करिष्यति येन लद्दाखं केन्द्र-प्रशासितेषु प्रदेशेषु अन्यतमत्वेन विकसितं कर्तुं शक्येत।

**टेनिस्**

टेनिस्-क्रीडायां अनिरुद्ध-चन्द्रशेखरः, रीस् स्टाल्डरः च मेक्सिको-देशे लॉस् काबोस् ओपन-क्रीडा-स्पर्धाया: पुरुषयुगलत्वेन उपांत्यचक्रे प्रवेशं कृतवन्तौ ।

**चतुरङ्ग-अर्जुन एरिगैसी : (HL-5)**

चतुरङ्गक्रीडायां भारतीयः क्रीडकः ग्रैण्ड मास्टर अर्जुन एरिगैसी, लासवेगास्-नगरे फ्रीस्टाइल-ग्राण्डस्लैम्-क्रीडायाः उपांत्यचक्रं प्रविष्टवान्। इत्थं अर्जुन: फ्रीस्टाइल-ग्राण्डस्लैम्-क्रीडायाः उपांत्यचक्रे प्रविष्ट: प्रथमः क्रीडकः संजात: अस्ति। एकविंशति-वर्षीयः क्रीडकः अर्जुन: उज्बेकिस्तानस्य नोदिर्बेक् अब्दुसत्तोरोव इत्यमुं प्रागुपान्त्यचक्रीय-क्रीडायां पराजितवान् अस्ति।

।।इति वार्ता।।